प्रथमः पाठः
१

# भारतभूवन्दना

## ( चतुर्थी विभक्तिः )

(प्रस्तुतपाठे पुण्यभारतभूमेः वन्दनं कृतमस्ति। भारतस्य नद्यः,पर्वताः, वनानि एव न अपितु प्रत्येकं कणः अपि रमणीयः प्रेरकश्च अस्ति। भारतभूः मातृवत् अस्मभ्यं सर्वं ददाति अतः आदौ एताम् आराधयामः।)



मातृभूमे! नमो मातृभूमे ! नमः ।
मातृभूमे! नमो मातृभूमे ! नमः ।।
तव गिरिभ्यो नमस्ते नदीभ्यो नमः ।
तव वनेभ्यो नमो जनपदेभ्यो नमः ।। १ ।।
मातृभूमे .........................

तव कणेभ्यो नमस्ते अणुभ्यो नमः।
मातृभूमे! नमो मातृभूमे ! नमः ।। २ ।।
मातृभूमे ...........................

प्राणदे! त्राणदे! देवि! शक्तिप्रदे!
ऋद्धिदे! सिद्धिदे! भुक्तिमुक्तिप्रदे! ।। ३ ।।
मातृभूमे ...........................

सर्वदे! सर्वदा देवि! तुभ्यं नमः ।
मातृभूमे! नमो मातृभूमे! नमः ।। ४ ।।
मातृभूमे ...........................

**भावार्थः** – भारतमातः! वयं त्वां प्रणमामः ।तव पर्वतेभ्यः अस्माकं नमस्कारः ।तव नदीभ्यः अस्माकं नमांसि ।भवत्याः वनेभ्यः जनपदेभ्यः, कणेभ्यः, सूक्ष्मेभ्यः अणुभ्यःच मम सादरं प्रणामाः । हे प्राणदायिनि! हे रक्षणकर्त्रि! हे शक्तिदात्रि ! हे समृद्धिदात्रि ! हे सिद्धिदात्रि ! भोगमोक्षप्रदायिनि मातृभूमे !तुभ्यं अस्माकं प्रणामाः ।भो देवि! सर्वदा भवत्यै अस्माकं सादरं वन्दनानि ।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| नमः | नमस्कारः | नमस्कार |
| तव | भवत्याः | तुम्हारे |
| गिरिभ्यः | नगेभ्यः | पर्वतों को |
| नदीभ्यः | सरिद्भ्यः | नदियों को |
| वनेभ्यः | अरण्येभ्यः | वनों को |
| जनपदेभ्यः | मण्डलेभ्यः | जिलों को |
| कणेभ्यः | अंशेभ्यः | कणों को |
| अणुभ्यः | सूक्ष्मकणेभ्यः | अणुओं को |
| प्राणदे ! | प्राणदात्रि ! | प्राण देने वाली |
| त्राणदे ! | रक्षणकर्त्रि ! | रक्षा करने वाली |
| शक्तिप्रदे ! | बलदायिनि ! | शक्ति प्रदान करने वाली |
| ऋद्धिदे ! | समृद्धिदायिनि ! | सम्पन्नता देने वाली |
| सिद्धिदे ! | सफलतादात्रि ! | पूर्णता देने वाली |
| भुक्तिमुक्तिप्रदे ! | भोगमुक्तिदायिनि ! | भोग और मुक्ति देने वाली |
| सर्वदे ! | सर्वदात्रि ! | सब कुछ देने वाली |
| सर्वदा | सदैव | सदा |
| तुभ्यम् | तव कृते | तुमको |

## अभ्यासः

१. निम्नलिखितशब्दानाम् उच्चारणं कुरुत –

| | | | |
|---|---|---|---|
| नदीभ्यो | जनपदेभ्यो | त्राणदे | शक्तिप्रदे |
| ऋद्धिदे | सिद्धिदे | भुक्तिमुक्तिप्रदे | मातृभूमे |

## २. एकवाक्येन उत्तरत –

(क) पाठानुसारेण कविः कां नमस्करोति ?

(ख) प्राणदात्री का अस्ति ?

(ग) मातृभूमेः केभ्यः भागेभ्यः नमः ?

(घ) मातृभूमिः किं किं ददाति ?

## ३. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत –

| त्राणदे , नमः, अणुभ्यः , भुक्तिमुक्तिप्रदे |
|---|

(क) मातृभूमे ! नमो मातृभूमे !.................................. ।

(ख) ऋद्धिदे ! सिद्धिदे !........................................... ।

(ग) प्राणदे !................................देवि ! शक्तिप्रदे ।

(घ) तव कणेभ्यो नमस्ते ................................ नमः ।

## ४. रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत –

(क) <u>कणेभ्यः</u> नमस्ते ।

(ख) मातृभूमिः <u>प्राणदात्री</u> अस्ति ।

(ग) <u>अणुभ्यः</u> नमः ।

(घ) <u>भारतभूमिः</u> शक्तिप्रदात्री अस्ति ।

## ५. चित्राणाम् आधारेण चतुर्थीविभक्तेः रूपाणि ज्ञात्वा रिक्तस्थानानि पूरयत –



अतिथिः **छात्राय** पारितोषिकं ददाति ।

(क)




अतिथिः **छात्रायै** पारितोषिकं ददाति ।

(ख)



अतिथिः **नर्तक्यै** पारितोषिकं ददाति ।

(ग)

| | | | | | |
|---|---|---|---|---|---|
| यथा– युवकः | युवकाय | बालिका | बालिकायै | नर्तकी | नर्तक्यै |
| मयूरः | ............ | छात्रा | ............ | जननी | ............ |
| सैनिकः | ............ | महिला | ............ | भगिनी | ............ |
| बालकः | ............ | स्थालिका | ............ | लेखनी | ............ |
| नायकः | ............ | अभ्यासपुस्तिका | ............ | नगरी | ............ |

**६. कोष्ठके प्रदत्तस्य शब्दस्य शुद्धं रूपं लिखत -**

**यथा** - पिता निर्धनाय **धनं** ददाति। (निर्धनः)

| | | |
|---|---|---|
| (क) | माता ..................................धनं ददाति। | (पुत्रः) |
| (ख) | जिज्ञासुः ज्ञानस्य ..................समयं ददाति। | (अर्जनम्) |
| (ग) | तरुणः .........................पुस्तकानि ददाति । | (मित्रम्) |
| (घ) | जनकः .........................शाटिकां ददाति । | (जननी) |
| (ङ) | ..............................................नमः । | (सूर्यः) |
| (च) | ..............................................नमः । | (शिक्षिका) |

**७. चतुर्थी विभक्तिं प्रयुज्य नूतनवाक्यानि रचयत -**

(क) ............................................ ।

(ख) ............................................ ।

(ग) ............................................ ।

(घ) ............................................ ।

(ङ) ............................................ ।

**८. चतुर्थीविभक्तेः रूपाणि लिखत -**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- | ग्रामाय | ग्रामाभ्याम् | ग्रामेभ्यः |
| | कृषकाय | ................. | ................ |
| | वित्तकोषाय | ................. | ................. |
| यथा- | वाटिकायै | वाटिकाभ्याम् | वाटिकाभ्यः |
| | पाकशालायै | ................. | ................. |
| | मालायै | ................. | ................. |
| यथा- | अङ्गुल्यै | अङ्गुलीभ्याम् | अङ्गुलीभ्यः |
| | भगिन्यै | ................. | ................. |
| | पितामह्यै | ................. | ................. |

**९. रेखाङ्कितपदं द्विवचने बहुवचने च परिवर्त्य रिक्तस्थाने वाक्यं लिखत -**

**यथा** - गुरुः <u>शिष्याय</u> ज्ञानं ददाति। गुरुः <u>शिष्याभ्यां</u> ज्ञानं ददाति। गुरुः <u>शिष्येभ्यः</u> ज्ञानं ददाति।

(क) पीयूषः <u>मित्राय</u> पुस्तकं ददाति। ............................ ................................

(ख) पितामही <u>पौत्राय</u> चाकलेहं ददाति। ............................ ................................

(ग) अध्यापकः <u>छात्रायै</u> गृहकार्यं ददाति। ............................ ................................

(घ) स्वामी <u>सेविकायै</u> कार्यं वदति। ............................ ................................

(ङ) अहं <u>तस्मै</u> परामर्शं वदामि। ............................ ................................

## योग्यता-विस्तारः

सादरं समीहताम् वन्दना विधीयताम्
श्रद्धया स्वमातृभू-समर्चना विधीयताम् ।।

आपदो भवन्तु वा, विद्युतो लसन्तु वा
आयुधानि भूरिशोऽपि मस्तके पतन्तु वा
धीरता न हीयतां, वीरता विधीयताम्
निर्भयेन चेतसा पदं पुरो निधीयताम् ।।

।। सादरं ...................... ।।

प्राणदायिनी इयं त्राणदायिनी इयं
शक्तिमुक्तिभक्तिदा सुधाप्रदायिनी इयम्।
एतदीयवन्दने सेवनेऽभिनन्दने
साभिमानमात्मनो जीवनं प्रदीयताम् ।।

।। सादरं ...................... ।।

**( श्रीवासुदेवद्विवेदी शास्त्री )**

**अध्यापकाय निर्देशः -**

। अध्यापकः प्रदत्तगीतस्य सस्वरवाचनं कारयेत्।